# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ९८

ते दूता रामवाक्येन चोदिता लघुविक्रमाः ।
प्रजग्मुर्मधुरां शीघ्रं चक्रुर्वासं न चाध्वनि ॥ १॥

ततस्त्रिभिरहो रात्रैः सम्प्राप्य मधुराम् अथ ।
शत्रुघ्नाय यथावृत्तमाचख्युः सर्वमेव तत् ॥ २॥

लक्ष्मणस्य परित्यागं प्रतिज्ञां राघवस्य च ।
पुत्रयोरभिषेकं च पौरानुगमनं तथा ॥ ३॥

कुशस्य नगरी रम्या विन्ध्यपर्वतरोधसि ।
कुशावतीति नाम्ना सा कृता रामेण धीमता ॥ ४॥

श्राविता च पुरी रम्या श्रावतीति लवस्य च ।
अयोध्यां विजनां चैव भरतं राघवानुगम् ॥ ५॥

एवं सर्वं निवेद्याशु शत्रुघ्नाय महात्मने ।
विरेमुस्ते ततो दूतास्त्वर राजन्निति ब्रुवन् ॥ ६॥

श्रुत्वा तं घोरसङ्काशं कुलक्षयमुपस्थितम् ।
प्रकृतीस्तु समानीय काञ्चनं च पुरोहितम् ॥ ७॥

तेषां सर्वं यथावृत्तमाख्याय रघुनन्दनः ।
आत्मनश्च विपर्यासं भविष्यं भ्रातृभिः सह ॥ ८॥

ततः पुत्रद्वयं वीरः सोऽभ्यषिञ्चन्नराधिपः ।
सुबाहुर्मधुरां लेभे शत्रुघाती च वैदिशम् ॥ ९॥

द्विधाकृत्वा तु तां सेनां माधुरीं पुत्रयोर्द्वयोः ।
धनधान्यसमायुक्तौ स्थापयामास पार्थिवौ ॥ १०॥

ततो विसृज्य राजानं वैदिशे शत्रुघातिनम् ।
जगाम त्वरितोऽयोध्यां रथेनैकेन राघवः ॥ ११॥

स ददर्श महात्मानं ज्वलन्तमिव पावकम् ।
क्षौमसूक्ष्माम्बरधरं मुनिभिः सार्धमक्षयैः ॥ १२॥

सोऽभिवाद्य ततो रामं प्राञ्जलिः प्रयतेन्द्रियः ।
उवाच वाक्यं धर्मज्ञो धर्ममेवानुचिन्तयन् ॥ १३॥

कृत्वाभिषेकं सुतयोर्युक्तं राघवयोर्धनैः ।
तवानुगमने राजन्विद्धि मां कृतनिश्चयम् ॥ १४॥

न चान्यदत्र वक्तव्यं दुस्तरं तव शासनम् ।
त्यक्तुं नार्हसि मां वीर भक्तिमन्तं विशेषतः ॥ १५॥

तस्य तां बुद्धिमक्लीबां विज्ञाय रघुनन्दनः ।
बाढमित्येव शत्रुघ्नं रामो वचनमब्रवीत् ॥ १६॥

तस्य वाक्यस्य वाक्यान्ते वानराः कामरूपिणः ।
ऋक्षराक्षससङ्घाश्च समापेतुरनेकशः ॥ १७॥

देवपुत्रा ऋषिसुता गन्धर्वाणां सुतास्तथा ।
राम क्षयं विदित्वा ते सर्व एव समागताः ॥ १८॥

ते राममभिवाद्याहुः सर्व एव समागताः ।
तवानुगमने राजन्सम्प्राप्ताः स्म महायशः ॥ १९॥

यदि राम विनास्माभिर्गच्छेस्त्वं पुरुषर्षभ ।
यमदण्डमिवोद्यम्य त्वया स्म विनिपातिताः ॥ २०॥

एवं तेषां वचः श्रुत्वा ऋक्षवानररक्षसाम् ।
विभीषणमथोवाच मधुरं श्लक्ष्णया गिरा ॥ २१॥

यावत्प्रजा धरिष्यन्ति तावत्त्वं वै विभीषण ।
राक्षसेन्द्र महावीर्य लङ्कास्थः स्वं धरिष्यसि ॥ २२॥

प्रजाः संरक्ष धर्मेण नोत्तरं वक्तुमर्हसि ॥ २३॥

तमेवमुक्त्वा काकुत्स्थो हनूमन्तमथाब्रवीत् ।
जीविते कृतबुद्धिस्त्वं मा प्रतिज्ञां विलोपय ॥ २४॥

मत्कथाः प्रचरिष्यन्ति यावल्लोके हरीश्वर ।
तावत्त्वं धारयन्प्राणान्प्रतिज्ञामनुपालय ॥ २५॥

तथैवमुक्त्वा काकुत्स्थः सर्वांस्तानृक्षवानरान् ।

मया सार्धं प्रयातेति तदा तान्राघवोऽब्रवीत् ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com